# अथ मंगलकवचम्



रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत्।
धरासुतः शक्तिधरश्च शूलो सदा मम स्याद्वरदः प्रशान्तः।।1।।

अङ्गारकः शिरो रक्षोन्मुखं वै धरणीसुतः।
श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः।।2।

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा।।3।।

वक्षः पातु वराङ्गश्च हृदयं पातु रोहितः।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः।।4।।

जानुजङ्घे कुजः पातु पादौ भक्तप्रियः सदा।
सर्वाण्यन्यानि चाङ्गानि रक्षेन्मे मेषवाहनः।।5।।

य इदं कवचं दिव्यं सर्वशत्रुनिवारणम्।
भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम्।।6।।

सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम्।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्य–वर्धनम्।
रोगबन्धविमोक्षं च सत्यमेतन्न संशयः।।7।।

।। इति श्रीमार्कण्डयपुराणे मङ्गलकवचं सम्पूर्णम्।।